मार्कण्डेयपुराणम्/अध्यायः ०५६-०६०



56(53)

षट्पञ्चाशोऽध्यायः- ५६

मार्कण्डेय उवाच

धराधरां जगद्योनेः पदं नारायणस्य च ।
ततः प्रवृत्ता या देवी गङ्गा त्रिपथगामिनी ॥५६.१ ॥

सा प्रविश्य सुधायोनिं सोममाधारमम्भसाम् ।
ततः सम्बध्यमानार्करश्मिसङ्गतिपावनी ॥५६.२ ॥

पपात मेरुपृष्ठे च सा चतुर्धा ततो ययौ ।
मेरुकूटतटान्तेभ्यो निपतन्ती ववर्तिता ॥५६.३ ॥

विकीर्यमाणसलिला निरालम्बा पपात सा ।
मन्दराद्येषु पादेषु प्रविभक्तोदका समम् ॥५६.४ ॥

चतुर्ष्वपि पपाताम्बुविभिन्नाङ्घ्रिरशिलोच्चया ।
पूर्वा सीतेऽति विख्याता ययौ चैत्ररथं वनम् ॥५६.५ ॥

तत् प्लावयित्वा च ययौ वरुणोदं सरोवनम् ।
शीतान्तञ्च गिरिं तस्मात्ततश्चान्यान् गिरीन् क्रमात् ॥५६.६ ॥

गत्वा भुवं समासाद्य भद्राश्वाज्जलधिं गता ।
तथैवालकनन्दाख्या दक्षिणे गन्धमादने ॥५६.७ ॥

मेरुपादवनं गत्वा नन्दनं देवनन्दनम् ।
मानसञ्च महावेगात् प्लापयित्वा सरोवरम् ॥५६.८ ॥

आसाद्य शैलराजानं रम्यं हि शिखरन्तथा ।
तस्माच्च पर्वतान् सर्वान् दक्षिणोपक्रमोदितान् ॥५६.९ ॥

तान् प्लावयित्वा संप्राप्ता हिमवन्तं महागिरिम् ।
दधार तत्र तां शम्भुर्न मुमोच वृषध्वजः ॥५६.१० ॥

भघीरथेनोपवासैः स्तुत्या चाराधितो विभुः ।
तत्र मुक्ता च शर्वेण सप्तधा दक्षिणोदधिम् ॥५६.११ ॥

प्रविवेश त्रिधा प्राच्यां प्लावयन्ती महानदी ।
भगीरथरथस्यानु स्त्रोतसैकेन दक्षिणाम् ॥५६.१२ ॥

तथैव पश्चिमे पादे विपुले सा महानदी ।
सुचक्षुरिति विख्याता वैभ्राजं साचलं ययौ ।५६.१३ ।
शीतोदञ्च सरस्तस्मात् प्लावयन्ती महानदी ।
सुचक्षुः पर्वतं प्राप्ता ततश्च त्रिशिखं गता ॥५६.१४ ॥

तस्मात् क्रमेण चाद्रीणां शिखरेषु निपत्य सा ।
केतुमालं समासाद्य प्रविष्टा लवणोदधिम् ॥५६.१५ ॥

सुपार्श्वन्तु तथैवाद्रिं मेरुपादं हि सा गता ।
(भद्रसोमेति) तत्र सोमेति विख्याता सा ययौ सवितुर्वनम् ॥

५६.१६ ॥

तत्पावयन्ती संप्राप्ता महाभद्रं सरोवरम् ।
ततश्च शङ्खकूटं सा प्रयाता वै महानदी ॥५६.१७ ॥

तस्माच्च वृषभादीन् सा क्रमात् प्राप्य शिलोच्चयान् ।
महार्णवमनुप्राप्ता प्लावयित्वोत्तरान् कुरून् ॥५६.१८ ॥

एवमेषा मया गङ्गां कथिता ते द्विजर्षभ ।
जम्बुद्वीपनिवेशश्च वर्षाणि च यथातथम् ॥५६.१९ ॥

वसन्ति तेषु सर्वेषु प्रजाः किंपुरुषादिषु ।
सुखप्राया निरातङ्का न्यूनतोत्कर्षवर्जिताः ॥५६.२० ॥

नवस्वपि च वर्षेषु सप्त सप्त कुलाचलाः ।
एकैकस्मिंस्तथा देशे नद्यश्चाद्रिविनिः सृताः ॥५६.२१ ॥

यानि किंपुरुषाद्यानि वर्षाण्यष्टौ द्विजोत्तम ।
तेषूद्भिज्जानि तोयानि मेघवार्यत्र भारते ॥५६.२२ ॥

वार्क्षी स्वाभाविकी देश्या तोयोत्था मानसी तथा ।
कर्मजा च नृणां सिद्धुर्वर्षेष्वेतेषु चाष्टसु ॥५६.२३ ॥

कामप्रदेभ्यो वृक्षेभ्यो वार्क्षी सिद्धिः स्वभावजा ।
स्वाभाविकी समाख्याता तृप्तिर्देश्या च दैशिकी ॥५६.२४ ॥

अपां शौक्ष्म्याच्च तोयोत्था ध्यानोपेता च मानसी ।
उपासनादिकार्यात्तु धर्मजा साप्युदाहृता ॥५६.२५ ॥

न चैतेषु युगावस्था नाध्यो व्याधयो न च ।
पुण्यापुण्यसमारम्भो नैव तेषु द्विजोत्तम ॥५६.२६ ॥

इति श्रीमार्कण्डेयपुराणे गङ्गावतारो नाम षट्पञ्चाशोऽध्यायः

57(54)

सप्तपञ्चाशोऽध्यायः- ५७

क्रौष्टुकिरुवाच

भगवन् ! कथितन्त्वेतज्जम्बूद्वीपं समासतः ।
यदेतद्भवता प्रोक्तं कर्म नान्यत्र पुण्यदम् ॥५७.१ ॥

पापाय वा महाभाग ! वर्जयित्वा तु भारतम् ।
इतः स्वर्गश्च मोक्षश्च मध्यञ्चान्तञ्च गम्यते ॥५७.२ ॥

न खल्वन्यत्र मर्त्यानां भूमौ कर्म विधीयते ।
तस्माद्विस्तरशो ब्रह्मन् ! ममैतद्भारतं वद ॥५७.३ ॥

ये चास्य भेदा यावन्तो यथावत् स्थितिरेव च ।

वर्षोऽयं द्विजशार्दूल ! ये चास्मिन् देशपर्वताः ॥५७.४ ॥

मार्कण्डेय उवाच

भारतस्यास्य वर्षस्य नव भेदान्निबोध मे ।

समुद्रान्तरिता ज्ञेयास्ते त्वगम्याः परस्परम् ॥५७.५ ॥

इन्द्रद्वीपः कशेरुमांस्ताम्रवर्णो गभस्तिमान् ।

नागद्वीपस्तथा सौम्यो गान्धर्वो वारुणस्तथा ॥५७.६ ॥

अयन्तु नवमस्तेषां द्वीपः सागरसंवृतः ।

योजनानां हसस्त्रं वै द्वीपोऽयं दक्षिणोत्तरात् ॥५७.७ ॥

पूर्वे किराता यस्यान्ते पश्चिमे यवनास्तथा ।

ब्राह्मणाः क्षत्रिया वैश्याः शूद्राश्चान्तः स्थिता द्विज ॥५७.८ ॥

इज्याध्यायवणिज्याद्यैः कर्मभिः कृतपावनाः ।
तेषां संव्यवहारश्च एभिः कर्मभिरिष्यते ॥५७.९ ॥

स्वर्गापवर्गप्राप्तिश्च पुण्यं पापञ्च वै तदा ।
महेन्द्रो मलयः सह्यः शुक्तिमानृक्षपर्वतः ॥५७.१० ॥

विन्ध्यश्च पारियात्रश्च सप्तैवात्र कुलाचलाः ।
तेषां सहस्रशश्चान्ये भूधरा ये समीपगाः ॥५७.११ ॥

विस्तारोच्छ्रयिणो रम्या विपुलाश्चात्र सानवः ।
कोलाहलः सवैभ्राजो मन्दरो दर्दुराचलः ॥५७.१२ ॥

वातस्वनो वैद्युतश्च मैनाकः स्वरसस्तथा ।
तुङ्गप्रस्थो नागगिरी रोचनः पाण्डराचलः ॥५७.१३ ॥

पुष्पो गिरिर्दुर्जयन्तो रैवतोऽर्बुद एव च ।
ऋष्यमूकः सगोमन्तः कूटशैलः कृतस्मरः ॥५७.१४ ॥

श्रीपर्वतश्चकोरश्च शतशोऽन्ये च पर्वताः ।
तैर्विमिश्रा जनपदा म्लेच्छाश्चार्याश्च भागशः ॥५७.१५ ॥

तैः पीयन्ते सरित्श्रेष्ठा यास्ताः सम्यङ्निबोध मे ।
गङ्गा सरस्वती सिन्धुश्चन्द्रभागा तथापरा ॥५७.१६ ॥

यमुना च शतद्रुश्च वितस्तेरावती कुहुः ।
गोमती धूतपापा च बाहुदा सदृशद्वती ॥५७.१७ ॥

विपाशा देविका रङ्क्षुर्निश्चीरा गण्डकी तथा ।
कौशिकी चापगा विप्र ! हिमवत्पादनिः सृताः ॥५७.१८ ॥

वेदस्मृतिर्वेदवती वृत्रघ्री सिन्धुरेव च ।
वेण्वा सानन्दनी चैव सदानीरा मही तथा ॥५७.१९ ॥

पारा चर्मण्वती नूपी विदिशा वेत्रवत्यपि ।

शिप्रा ह्यवर्णो च तथा पारियात्राश्रयाः स्मृताः ॥५७.२० ॥

शोणो महानदश्चैव नर्मदा सुरथाद्रिजा ।

मन्दाकिनी दशार्णा च चित्रकूटा तथापरा ॥५७.२१ ॥

चित्रोत्पला सतमसा करमोदा पिशाचिका ।

तथान्या पिप्पलिश्रोणिर्विपाशा वञ्जुला नदी ॥५७.२२ ॥

सुमेरुजा शुक्तिमती शकुली त्रिदिवाक्रमुः ।

(विन्ध्य) (स्कन्ध) पादप्रसूता वै तथान्या वेगवाहिनी ॥५७.२३ ॥

शिप्रा पयोष्णी निर्विन्ध्या तापी सनिषधावती ।

वेण्या वैतरणी चैव सिनीवाली कुमुद्वती ॥५७.२४ ॥

करतोया महागौरी दुर्गा चान्तः शिरा तथा ।

(ऋक्ष) (विन्ध्य) पादप्रसूतास्ता नद्यः पुण्यजलाः शुभाः ॥

५७.२५ ॥

गोदावरी भीमरथा कृष्णा वेण्या तथापरा ।
तुङ्गभद्रा सुप्रयोगा वाह्या कावेर्यथापगा ॥५७.२६ ॥

(सह्य) (विन्ध्य) पादविनिष्क्रान्ता इत्येताः सरिदुत्तमाः ।
कृतमाला ताम्रपर्णो पुष्पजा सूत्पलावती ॥५७.२७ ॥

मलयाद्रिसमुद्भूता नद्यः शीतजलास्त्विमाः ।
पितृसोमर्षिकुल्या च इक्षुका त्रिदिवा च या ॥५७.२८ ॥

लाङ्गूलिनी वंशकरा महेन्द्रप्रभवाः स्मृताः ।
ऋषिकुल्या कुमारी च मन्दगा मन्दवाहिनी ॥५७.२९ ॥

कृपा पलाशिनी चैव शुक्तिमत्प्रभवाः स्मृताः ।
सर्वाः पुण्याः सरस्वत्यः सर्वा गङ्गाः समुद्रगाः ॥५७.३० ॥

विश्वस्य मातरः सर्वाः सर्वपापहराः स्मृताः ।

अन्याः सहस्रशश्चोक्ताः क्षुद्रनद्यो द्विजोत्तम ॥५७. ३१ ॥

प्रावृद्कालवहाः सन्ति सदाकालवहाश्च याः ।
मत्स्याश्वकूटाः कुल्याश्च कुन्तलाः काशिकोशलाः ॥५७.३२ ॥

अथर्वाश्चार्कलिङ्गाश्च मलकाश्च वृकैः सह ।
मध्यदेश्या जनपदाः प्रायशोऽमी प्रकीर्तिताः ॥५७.३३ ॥

सह्यस्य चोत्तरे या तु यत्र गोदावरी नदी ।
पृथिव्यामपि कृतस्त्रायां स प्रदेशो मनोरमः ॥५७.३४ ॥

गोवर्धनं पुरं रम्यं भार्गवस्य महात्मनः ।
वाह्लीका वाटधानाश्च आभीराः कालतोयकाः ॥५७.३५ ॥

अपरान्ताश्च शूद्राश्च पल्लवाश्चर्मखण्डिकाः ।
गान्धारा गबलाश्चैव सिन्धुसौवीरमद्रकाः ॥५७.३६ ॥

शतद्रुजाः कलिङ्गाश्च पारदा हालमूषिकाः ।

माठरा बहुभद्राश्च कैकेया दशमालिकाः ॥५७.३७॥

क्षत्रियोपनिवेशाश्च वैश्यशूद्रकुलानि च ।

काम्बोजा दरदाश्चैव वर्वरा हर्षवर्धनाः ॥५७.३८॥

चीनाश्चैव तुखाराश्च बहुला बाह्यतोनराः ।

आत्रेयाश्च भरद्वाजाः पुष्कलाश्च कशेरुकाः ॥५७.३९॥

लम्पाकाः शूलकाराश्च चूलिका जागुडैः सह ।

औषधाश्चानिमद्राश्च किरातानाञ्च जातयः ॥५७.४०॥

तामसा हंसमार्गाश्च काश्मीरास्तुङ्गनास्तथा ।

शूलिकाः कुहकाश्चैव ऊर्णा दर्वास्तथैव च ॥५७.४१॥

एते देशा ह्युदीच्यास्तु प्राच्यान्देशान्निबोध मे ।

अध्रारका मुदकरा अन्तर्गिर्या बहिर्गिराः ॥५७.४२॥

यथा प्रवङ्गा रङ्गेया मानदा मानवर्तिकाः ।
ब्राह्मोत्तराः प्रविजया भार्गवा ज्ञेयमल्लकाः ॥५७.४३ ॥

प्राग्ज्योतिषाश्च मद्राश्च विदेहास्ताम्रलिप्तकाः ।
मल्ला मगधगोमन्ताः प्राच्या जनपदाः स्मृताः ॥५७.४४ ॥

अथापरे जनपदा दक्षिणापथवासिनः ।
पुण्ड्राश्च केवलाश्चैव गोलाङ्गूलास्तथैव च ॥५७.४५ ॥

शैलूषा मूषिकाश्चैव कुसुमा नामवासकाः ।
महाराष्ट्रा माहिषका कलिङ्गाश्चैव सर्वशः ॥५७.४६ ॥

आभीराः सह वैशिक्या आढक्याः शबराश्च ये ।
पुलिन्दा विन्ध्यमौलेया वैदर्भा दण्डकैः सह ॥५७.४७ ॥

पौरिका मौलिकाश्चैव अश्मका भोगवर्धनाः ।

नैषिकाः कुन्तला अन्धा उदिभदा वनदारकाः ॥५७.४८ ॥

दाक्षिणात्यास्त्वमी देशा अपरान्तान् निबोध मे ।
सूर्पारकाः कालिबला दुर्गाश्चानीकटैः सह ॥५७.४९ ॥

पुलिन्दाश्च सुमीनाश्च रूपपाः स्वापदैः सह ।
तथा कुरुमिनश्चैव सर्वे चैव कठाक्षराः ॥५७.५० ॥

नासिक्यावाश्च ये चान्ये ये चैवोत्तरनर्मदाः ।
भीरुकच्छाः समाहेयाः सह सारस्वतैरपि ॥५७.५१ ॥

काश्मीराश्च सुराष्ट्राश्च अवन्त्याश्चार्बुदैः सह ।
इत्येते ह्यपरान्ताश्च शृणु विन्ध्यनिवासिनः ॥५७.५२ ॥

सरजाश्च करूषाश्च केरलाश्चोत्कलैः सह ।
उत्तमर्णा दशार्णाश्च भोज्याः किष्किन्धकैः सह ॥५७.५३ ॥

तोशला: कोशलाश्चैव त्रैपुरा वैदिशास्तथा ।
तुम्बुरास्तुम्बुलाश्चैव पटवो नैषधैः सह ॥५७.५४ ॥

अन्नजास्तुष्टिकाराश्च वीरहोत्रा ह्यवन्तयः ।
एते जनपदाः सर्वे विन्ध्यपृष्ठनिवासिनः ॥५७.५५ ॥

अतो देशान् प्रवक्षयामि पर्वताश्रयिणश्च ये ।
नीहारा हंसमार्गाश्च कुरवो गुर्गणाः खसाः ॥५७.५६ ॥

कुन्तप्रावरणाश्चैव ऊर्णा दार्वाः सकृत्रकाः ।
त्रिगर्ता गालवाश्चैव किरातास्तामसैः सह ॥५७.५७ ॥

कृतत्रेतादिकश्चात्र चतुर्युगकृतो विधिः ।
एतत्तु भारतं वर्षं चतुः संस्थानसंस्थितम् ॥५७.५८ ॥

दक्षिणापरतो ह्यस्य पूर्वेण च महोदधिः ।
हिमवानुत्तरेणास्य कार्मुकस्य यथा गुणः ॥५७.५९ ॥

तदेतद् भारतं वर्षं सर्वबीजं द्विजोत्तम ।
ब्रह्मत्वममरेशत्वं देवत्वं मरुतस्तथा ॥५७.६० ॥

मृगपश्वप्सरोयोनिस्तद्वत् सर्वे सरीसृपाः ।
स्थावराणाञ्च सर्वेषामितो ब्रह्मन् ! शुभाशुभैः ॥५७.६१ ॥

प्रयाति कर्मभूर्ब्रह्मन् ! नान्या लोकेषु विद्यते ।
देवानामपि विप्रर्षे ! सदा एष मनोरथः ॥५७.६२ ॥

अपि मानुष्यमाप्स्यामो देवत्वात् प्रच्युताः क्षितौ ।
मनुष्यः कुरुते तत्तु यन्न शक्यं सुरासुरैः ॥५७.६३ ॥

तत्कर्मनिगडग्रस्तैः स्वकर्मख्यापनोत्सुकः ।
न किञ्चित् क्रियते कर्म सुखलेशोपबृंहितैः ॥५७.६४ ॥

इति श्रीमार्कण्डेयपुराणेठनद्यादिवर्णनऽ नाम सप्तपञ्चाशोऽध्यायः

58(55)

अष्टपञ्चाशोऽध्यायः- ५८

क्रौष्टुकिरुवाच

भगवन् ! कथितं सम्यक् भवता भारतं मम ।
सरितः पर्वता देशा ये च तत्र वसन्ति वै ॥५८.१ ॥

किन्तु कूर्मस्त्वया पूर्वं भारते भगवान् हरिः ।
कथितस्तस्य संस्थानं श्रोतुमिच्छाम्यशेषतः ॥५८.२ ॥

कथं स संस्थितो देवः कूर्मरूपी जनार्दनः ।
शुभाशुभं मनुष्याणां व्यज्यते च ततः कथम् ।
यथामुखं यथापादन्तस्य तद् ब्रूह्यशेषतः ॥५८.३ ॥

मार्कण्डेय उवाच

प्राङ्मुखो भगवान् ! देवः कूर्मरूपी व्यवस्थितः ।
आक्रम्य भारतं वर्षं नवभेदमिदं द्विज ॥५८.४ ॥

नवधा संस्थितान्यस्य नक्षत्राणि समन्ततः ।
विषयाश्च द्विजश्रेष्ठ ! ये सम्यक् तान्निबोध मे ॥५८.५ ॥

वेदमन्त्रा विमाण्डव्याः शाल्वनीपास्तथा शकाः ।
उज्जिहानास्तथा वत्स ! घोषसंख्यास्तथा खसाः ॥५८.६ ॥

मध्ये सारस्वता मत्स्याः शूरसेनाः समाथुराः ।
धर्मारण्या ज्योतिषिका गौरग्रीवा गुडाश्मकाः ॥५८.७ ॥

कालकोटिसपाषण्डाः पारियात्रनिवासिनः ।

कापिङ्गला: कुरुर्बाह्यस्तथैवोडुम्बरा जना: ॥५८.८ ॥

वैदेहका: सपाञ्चाला: संकेता: कङ्कमारुता: ।
गजाह्वयाश्च कूर्मस्य जलमध्यनिवासिन: ॥५८.९ ॥

कृत्तिका रोहिणी सौम्या एतेषां मध्यवासिनाम् ।
नक्षत्रतित्रतयं विप्र ! शुभाशुभविपाकदम् ॥५८.१० ॥

वृषध्वजोऽञ्जनश्चैव जम्ब्वाख्यो मानवाचल: ।
शूर्पकर्णो व्याघ्रमुख: खर्मक: कर्वटाशन: ॥५८.११ ॥

तथा चन्द्रेश्वराश्चैव खशाश्च मगधास्तथा ।
गिरयो मैथिला: शुभ्रास्तथा वदनदन्तुरा: ॥५८.१२ ॥

प्रागज्योतिषा: सलौहित्या: सामुद्रा: पुरुषादका: ।
पुर्णोत्कटो भद्रगौरस्तथोदयगिरिर्द्विज !॥५८.१३ ॥

कशाया मेखलामुष्टास्ताम्रलिप्तैकपादपाः ।
वर्धमाना कोशलाश्च मुखे कूर्मस्य संश्थिताः ॥५८.१४ ॥

रौद्रः पुनर्वसुः पुष्यो नक्षत्रत्रितयं मुखे ।
पादे तु दक्षिणे देशाः क्रौष्टुके वदतः शृणु ॥५८.१५ ॥

कलिङ्गवङ्गजठराः कोशला मूषिकास्तथा ।
चेदयश्चोर्ध्वकर्णाश्च मत्स्याद्या विन्ध्यवासिनः ॥५८.१६ ॥

विदर्भा नारिकेलाश्च धर्मद्वीपास्तथैलिकाः ।
व्याघ्रग्रीवा महाग्रीवास्त्रैपुराः श्मश्रुधारिणः ॥५८.१७ ॥

कैष्किन्ध्या हैमकूटाश्च निषधाः कटकस्थलाः ।
दशार्णाहारिका नग्ना निषादाः काकुलालकाः ॥५८.१८ ॥

तथैव पर्णशबराः पादे वै पूर्वदक्षिणे ।
आश्लेषर्क्षं तथा पैत्र्यं फाल्गुण्यः प्रथदमास्तथा ॥५८.१९ ॥

नक्षत्रत्रितयं पादमाश्रितं पूर्वदक्षिणम् ।
लङ्का कालाजिनाश्चैव शैलिका निकटास्तथा ॥५८.२० ॥

महेन्द्रमलयाद्रौ च दुर्दुरे च वसन्ति ये ।
कर्कोटकवने ये च भृगुकच्छाः सकोङ्कणा ॥५८.२१ ॥

सर्वाश्चैव तथाभीरा वेण्यास्तीरनिवासिनः ।
अवन्तयो दासपुरास्तथैवाकणिनो जनाः ॥५८.२२ ॥

महाराष्ट्राः सकर्णाटा गोनर्दाश्चित्रकूटकाः ।
चोलाः कोलगिराश्चैव क्रौञ्चद्वीपजटाधराः ॥५८.२३ ॥

कावेरी ऋष्यमूकस्था नासिक्याश्चैव ये जनाः ।
शङ्खशुक्त्यादिवैदूर्यशैलप्रान्तचराश्च ये ॥५८.२४ ॥

तथा वारिचराः कोलाः चर्मपट्टनिवासिनः ।

गणबाह्याः पराः कृष्णा द्वीपवासनिवासिनः ॥५८.२५ ॥

सूर्याद्रौ कुमुदाद्रौ च ते वसन्ति तथा जनाः ।
औखावनाः सपिशिकास्तथा ये कर्मनायकाः ॥५८.२६ ॥

तक्षिणाः कौरुषा ये च ऋषिकास्तापसाश्रमाः ।
ऋषभाः सिहलाश्चैव तथा काञ्चीनिवासिनः ॥५८.२७ ॥

तिलङ्गा कुञ्जारदरीकच्छवासाश्च ये जनाः ।
ताम्रपर्णो तथा कुक्षिरिति कूर्मस्य दक्षिणः ॥५८.२८ ॥

फाल्गुन्यश्चोत्तरा हस्ता चित्रा चर्क्षत्रयं द्विज ।
कूर्मस्य दक्षिणे कुक्षौ बाह्यपादस्तथापरम् ॥५८.२९ ॥

काम्बोजाः पह्लवाश्चैव तथैव वहवामुखाः ।
तथा च सिन्दुसौवीराः सानर्ता वनितामुखाः ॥५८.३० ॥

द्रावणाः मार्गिकाः शूद्रा कर्णप्राधेयवर्वराः ।
किराताः पारदाः पाण्ड्यास्तथा पारशवाः कलाः ॥५८.३१ ॥

धूर्तका हैमगिरिकाः सिन्धुकालकवैरताः ।
सौराष्ट्रा दरदाश्चैव द्राविडाश्च महार्णवाः ॥५८.३२ ॥

एते जनपदाः पादे स्थिता वै दक्षिणेऽपरे ।
स्वात्यो विशाखा मैत्रञ्च नक्षत्रत्रयमेव च ॥५८.३३ ॥

मणिमेघः क्षुरादिश्च खञ्जनोऽस्तगिरिस्तथा ।
अपरान्तिका हैहयाश्च शान्तिका विप्रशस्तकाः ॥५८.३४ ॥

कौङ्कणाः पञ्चनदका वामना ह्यवरास्तथा ।
तारक्षुरा ह्यङ्गतकाः कर्कराः शाल्मवेश्मकाः ॥५८.३५ ॥

गुरुस्विराः फल्गुणका वेणुमत्याञ्च ये जनाः ।
तथा फल्गुलुका घोरा गुरुहाश्च कलास्तथा ॥५८.३६ ॥

एकेक्षणा वाजिकेशा दीर्घग्रीवाः सचूलिकाः ।
अश्वकेशास्तथा पुच्छे जनाः कूर्मस्य संस्थिताः ॥५८.३७ ॥

ऐन्द्रं मूलन्तथाषाग नक्षत्रत्रयमेव च ।
माण्डव्याश्चण्डखाराश्च अश्वकालनतास्तथा ॥५८.३८ ॥

कुन्यतालडहाश्चैव स्त्रीबाह्या बालिक्रास्तथा ।
नृसिंहा वेणुमत्याञ्च बलावस्थास्तथापरे ॥५८.३९ ॥

धर्मबद्धास्तथालूका उरुकर्मस्थिता जनाः ।
वामपादे जनाः पार्श्वे स्थिताः कूर्मस्य भागुरे ॥५८.४० ॥

आषाढाश्रवणे चैव धनिष्ठा यत्र संस्थिता ।
कैलासो हिमवांश्चैव धनुष्मान् वसुमांस्तथा ॥५८.४१ ॥

क्रौञ्चाः कुरुवकाश्चैव क्षुद्रवीणाश्च ये जनाः ।

रसालया सकैकेया भोगप्रस्था: सयामुना: ॥५८.४२ ॥

अन्तर्द्वोपास्त्रिगर्ताश्च अग्नीज्या: सार्दना जना: ।
तथैवाश्वमुखा: प्राप्ताश्चिविडा: केशधारिण: ॥५८.४३ ॥

दासेरका वाटधाना: शवधानास्तथैव च ।
पुष्कलाधमकैरातास्तथा तक्षशिलाश्रया: ॥५८.४४ ॥

अम्बाला मालवा मद्रा वेणुका: सवदन्तिका: ।
पिङ्गला मानकलहा हूणा: कोहलकास्तथा ॥५८.४५ ॥

माण्डव्या भूतियुवका: शातका हेमतारका: ।
यशोमत्या: सगान्धारा: खरसागरराशय: ॥५८.४६ ॥

यौधेया दासमेयाश्च राजन्या: श्यामकास्तथा ।
क्षेमधूर्ताश्च कूर्मस्य वामकुक्षिमुपाश्रिता: ॥५८.४७ ॥

वारुणञ्चात्र नक्षत्रं तत्र प्रौष्ठपदाद्वयम् ।
येन किन्नरराज्यञ्च पुशुपालं सकीचकम् ॥५८.४८ ॥

काश्मीरकं तथा राष्ट्रमभिसारजनस्तथा ।
दवदास्त्वङ्गनाश्चैव कुलटा वनराष्ट्रका: ॥५८.४९ ॥

सैरिष्ठा ब्रह्मपुरकास्तथैव वनवाह्यका: ।
किरातकौशिका नन्दा जना: पह्लवलोलना: ॥५८.५० ॥

दार्वादा मरकाश्चैव कुरटाश्चान्नदारका: ।
एकपादा खशा घोषा: स्वर्गभौमानवद्यका: ॥५८.५१ ॥

तथा सयवना हिङ्गाश्चीरप्रावरणाश्च ये ।
त्रिनेत्रा: पौरवाश्चैव गन्धर्वाश्च द्विजात्तम ॥५८.५२ ॥

पूर्वोत्तरन्तु कूर्मस्य पदामेते समाश्रिता: ।
रेवत्यश्चाश्विदैवत्यं याम्यञ्चर्क्षमिति त्रयम् ॥५८.५३ ॥

तत्र पादे समाख्यातं पाकाय मुनिसत्तम ।

देशेष्वेतेषु चैतानि नक्षत्राण्यपि वै द्विज ॥५८.५४ ॥

एतत्पीडा अमी देशाः पीड्यन्ते ये क्रमोदिताः ।

यान्ति चाभ्युदयं विप्र ! ग्रहैः सम्यगवस्थितैः ॥५८.५५ ॥

यस्यर्क्षस्य पतिर्यो वै ग्रहस्तद्भावितो भयम् ।

तद्देशस्य मुनिश्रेष्ठ ! तदुत्कर्षे शुभागमः ॥५८.५६ ॥

प्रत्येकं देशसामान्यं नक्षत्रग्रहसम्भवम् ।

भयं लोकस्य भवति शोभनं वा द्विजोत्तम ॥५८.५७ ॥

स्वर्क्षैरशोभनैर्जन्तोः सामान्यमिति भीतिदम् ।

ग्रहैर्भवति पीडोत्थमल्पायासमशोभनम् ॥५८.५८ ॥

तथैव शोभनः पाको दुः स्थितैश्च तथा ग्रहैः ।

अल्पोपकाराय नृणां देशज्ञैश्चात्मनो बुधैः ॥५८.५९ ॥

द्रव्ये गोष्ठेऽथ भृत्येषु सुहृत्सु तनयेषु वा ।
भार्यायाञ्च ग्रहे दुस्थे भयं पुण्यवतां नृणाम् ॥५८.६० ॥

आत्मन्यथाल्पपुण्यानां सर्वत्रैवातिपापिनाम् ।
नैकत्रापि ह्यपापानां भयमस्ति कदाचन ॥५८.६१ ॥

दिग्देशजनसामान्यं नृपसामान्यमात्मजम् ।
नक्षत्रग्रहसामान्यं नरो भुङ्क्ते शुभाशुभम् ॥५८.६२ ॥

परस्पराभिरक्षा च ग्रहादौस्थ्येन जायते ।
एतेभ्य एव विप्रेन्द्र ! शुभहानिस्तथाशुभैः ॥५८.६३ ॥

यदेतत् कूर्मसंस्थानं नक्षत्रेषु मयोदितम् ।
एतत् तु देशसामान्यमशुभं शुभमेव च ॥५८.६४ ॥

तस्माद्विज्ञाय देशर्क्षं ग्रहपीडान्तथात्मनः ।
कुर्वीत शान्तिं मेधावी लोकवादांश्च सत्तम ॥५८.६५ ॥

आकाशाद्देवतानाञ्च दैत्यादीनाञ्च दौर्हृदाः ।
पृथ्व्यां पतन्ति ते लोके लोकवादा इति श्रुताः ॥५८.६६ ॥

तां तथैव बुधः कुर्यात् लोकवादान्न हापयेत् ।
तेषान्तत्करणान्नॄणां युक्तो दुष्टागमक्षयः ॥५८.६७ ॥

शुभोदयं प्रहानिञ्च पापानां द्विजसत्तम ।
प्रज्ञाहानिं प्रकुर्युस्ते द्रव्यादीनाञ्च कुर्वते ॥५८.६८ ॥

तस्माच्छान्तिपरः प्राज्ञो लोकवादरतस्तथा ।
लोकवादांश्च शान्तीश्च ग्रहपीडासु कारयेत् ॥५८.६९ ॥

अद्रोहानुपवासांश्च शस्तं चैत्यादिवन्दनम् ।
जपं होमं तथा दानं स्त्रानं क्रोधादिवर्जनम् ॥५८.७० ॥

अद्रोहः सर्वभूतेषु मैत्रीं कुर्याच्च पण्डितः ।
वर्जयेदसतीं वाचमतिवादांस्तथैव च ॥५८.७१ ॥

ग्रहपूजाञ्च कुर्वीत सर्वपीडासु मानवः ।
एवं शाम्यन्त्यशेषाणि घोराणि द्विजसत्तम ॥५८.७२ ॥

प्रयतानां मनुष्याणां ग्रहर्क्षोत्थान्यशेषतः ।
एष कूर्मो मया ख्यातो भारते भगवान् विभुः ॥५८.७३ ॥

नारायणो ह्यचिन्त्यात्मा यत्र सर्वं प्रतिष्ठितम् ।
तत्र देवाः स्थिताः सर्वे प्रतिनक्षत्रसंश्रयाः ॥५८.७४ ॥

तथा मध्ये हुतवहः पृथ्वी सोमश्च वै द्विज ।
मेषादयस्त्रयो मध्ये मुखे द्वौ मिथुनादिकौ ॥५८.७५ ॥

प्रागदक्षिणे तथा पादे कर्कसिंहौ व्यवस्थितौ ।

सिंहकन्यातुलाश्चैव कुक्षौ राशैत्रयं स्थितम् ॥५८.७६ ॥

तुलाथ वृश्चिकाश्चोभौ पादे दक्षिणपश्चिमे ।
पृष्ठे च वृश्चिकेनैव सह धन्वी व्यवस्थितः ॥५८.७७ ॥

वायव्ये चास्य वै पादे धनुर्ग्राहादिकं त्रयम् ।
कुम्भमीनौ तथैवास्य उत्तरां कुक्षिमाश्रितौ ॥५८.७८ ॥

मीनमेषौ द्विजश्रेष्ठ ! पादे पूर्वोत्तरे स्थितौ ।
कूर्मे देशास्तथर्क्षाणि देशेष्वेतेषु वै द्विज ॥५८.७९ ॥

राशयश्च तथर्क्षेषु ग्रहराशिष्ववस्थिताः ।
तस्माद् ग्रहर्क्षपीडासु देशपीडां विनिर्दिशेत् ॥५८.८० ॥

तत्र स्त्रात्वा प्रकुर्वीत दानहोमादिकं विधिम् ।
स एष वैष्णवः पादो ब्रह्मा मध्ये ग्रहस्य यः ।
नारायणाख्योऽचिन्त्यात्मा कारणं जगतः प्रभुः ॥५८.८१ ॥

इति श्रीमार्कण्डेयपुराणे कूर्मनिवेशो नामाष्टपञ्चाशोऽध्यायः

59(56)

ऊनषष्टितमोऽध्यायः- ५९

मार्कण्डेय उवाच

एवन्तु भारतं वर्षं यथावत् कथितं मुने ।
कृतं त्रेता द्वापरञ्च तथाथिष्यं चतुष्टयम् ॥५९.१ ॥

अत्रैवैतद्युगानान्तु चातुर्वर्ण्योऽत्र वै द्विज ।
चत्वारि त्रीणि द्वे चैव तथैकञ्च शरच्छतम् ॥५९.२ ॥

जीवन्त्यत्र नरा ब्रह्मन् ! कृतत्रेतादिके क्रमात् ।

देवकूटस्य पूर्वस्य शैलेन्द्रस्य महात्मनः ॥५९.३ ॥

पूर्वेण यत् स्थितं वर्षं भद्राश्वं तन्निबोध मे ।
श्वेतपर्णश्च नीलश्च शैवालश्चाचलोत्तमः ॥५९.४ ॥

कौरञ्जः पर्णशालाग्रः पञ्चैते तु कुलाचलाः ।
तेषां प्रसूतिरन्ये ये बहवः क्षुद्रपर्वताः ॥५९.५ ॥

तैर्विशिष्टा जनपदा नानारूपाः सहस्रशः ।
ततः कुमुदसंकाशाः शुद्धसानुसुमङ्गलाः ॥५९.६ ॥

इत्येवमादयोऽन्येऽपि शतशोऽथ सहस्रशः ।
सीता शङ्खावती भद्रा चक्रावर्तादिकास्तथा ॥५९.७ ॥

नद्योऽथ बह्व्यो विस्तीर्णाः शीततोयौघवाहिकाः ।
अत्र वर्षे नराः शङ्खशुद्धहेमसमप्रभाः ॥५९.८ ॥

दिव्यसङ्गमिनः पुण्या दशवर्षशतायुषः ।
मन्दोत्तमौ न तेषु स्तः सर्वे ते समदर्शनाः ॥५९.९ ॥

तितिक्षादिभिरष्टाभैः प्रकृत्या ते गुणैर्युताः ।
तत्राप्यश्वशिरा देवश्चतुर्बाहुर्जनार्दनः ॥५९.१० ॥

शिरोहृदयोमेढ्राङ्घ्रिरहस्तैश्चाक्षित्रयान्वितः ।
तस्याप्यथैवं विषया विज्ञेया जगतः प्रभोः ॥५९.११ ॥

केतुमालमतो वर्षं निबोध मम पश्चिमम् ।
विशालः कम्बलः कृष्णो जयन्तो हरिपर्वतः ॥५९.१२ ॥

विशोको वर्धमानश्च सप्तैते कुलपर्वताः ।
अन्ये सहस्रशः शैला येषु लोकगणः स्थितः ॥५९.१३ ॥

मौलयस्ते महाकायाः शाकपोतकम्भकाः ।
अङ्गुलप्रमुखाश्चापि वसन्ति शतशो जनाः ॥५९.१४ ॥

ये पिबन्ति महानद्यो वङ्क्षुं श्यामां सकम्बलाम् ।
अमोघां कामिनीं श्यामां तथैवान्याः सहस्रशः ॥५९.१५॥

अत्राप्यायुः समं पूर्वैरत्रापि भगवान् हरिः ।
वराहरूपी पादास्यहृत्पृष्ठपार्श्वतस्तथा ॥५९.१६॥

त्रिनक्षत्रयुते देशे नक्षत्राणि शुभानि च ।
इत्येतत् केतुमालन्ते कथितं मुनिसत्तम ॥५९.१७॥

अतः परं कुरून् वक्षये निबोधेह ममोत्तरान् ।
तत्र वृक्षा मधुफला नित्यपुष्पफलोपगाः ॥५९.१८॥

वस्त्राणि च प्रसूयन्ते फलेष्वाभरणानि च ।
सर्वकामप्रदास्ते हि सर्वकामफलप्रदाः ॥५९.१९॥

भूमिर्मणिमयी वायुः सुगन्धः सर्वदा सुखः ।

जायन्ते मानवास्तत्र देवलोकपरिच्युताः ॥५९.२० ॥

मिथुनानि प्रसूयन्ते समकालस्थितानि वै ।
अन्योन्यमनुरक्तानि चक्रवाकोपमानि च ॥५९.२१ ॥

चतुर्दशसहस्राणि तेषां सार्धानि वै स्थितिः ।
चन्द्रकान्तश्च शैलेन्द्रः सूर्यकान्तस्तथापरः ॥५९.२२ ॥

तस्मिन् कुलाचलौ वर्षे तन्मध्ये च महानदी ।
भद्रसोमा प्रयात्युर्व्यां पुण्यामलजलौघिनी ॥५९.२३ ॥

सहस्रशस्तथैवान्या नद्यो वर्षेऽपि चोत्तरे ।
तथान्याः क्षीरवाहिन्यो घृतवाहिन्य एव च ॥५९.२४ ॥

दध्नो ह्रदास्तथा तत्र तथान्ये चानुपर्वताः ।
अमृतास्वादकल्पानि फलानि विविधानि च ॥५९.२५ ॥

वनेषु तेषु वर्षेषु शतशोऽथ सहस्रशः ।
तत्रापि भगवान् विष्णुः प्राक्शिरा मत्स्यरूपवान् ॥५९.२६ ॥

विभक्तो नवधा विप्र ! नक्षत्राणां त्रयं त्रयम् ।
दिशस्तथापि नवधा विभक्ता मुनिसत्तम ॥५९.२७ ॥

चन्द्रद्वीपः समुद्रे च भद्रद्वीपस्तथापरः ।
तत्रापि पुण्यो विख्यातः समुद्रान्तर्महामुने ॥५९.२८ ॥

इत्येतत् कथितं ब्रह्मन् ! कुरुवर्षं मयोत्तरम् ।
शृणु किंपुरुषादीनि वर्षाणि गदतो मम ॥५९.२९ ॥

इति श्रीमार्कण्डेयपुराणेठौत्तरकुरुकथनंऽ
नामैकोनषष्टितमोऽध्यायः

60(57)

षष्टितमोऽध्यायः- ६०

मार्कण्डेय उवाच

यत्तु किम्पुरुषं वर्षं तत् प्रवक्षयाम्यहं द्विज ।
यत्रायुर्दशसाहस्त्रं पुरुषाणां वपुष्मताम् ॥६०.१ ॥

अनामया ह्यशोकाश्च नरा यत्र तथा स्त्रियः ।
प्लक्षः षण्डश्च तत्रोक्तः सुमहान्नन्दनोपमः ॥६०.२ ॥

तस्य ते वै फलरसं पिबन्तः पुरुषाः सदा ।
स्थिरयौवननिष्पन्नाः स्त्रियश्चोत्पलगन्धिकाः ॥६०.३ ॥

अतः परं किंपुरुषाद्धरिवर्षं प्रचक्षयते ।
महारजतसङ्काशा जायन्ते तत्र मानवाः ॥६०.४ ॥

देवलोकच्युताः सर्वे देवरूपाश्च सर्वशः ।
हरिवर्षे नराः सर्वे पिबन्तीक्षुरसं शुभम् ॥६०.५ ॥

न जरा बाधते तत्र न जीर्यन्ते च कर्हिचित् ।
तावन्तमेव ते कालं जीवन्त्यथ निरामयाः ॥६०.६ ॥

मेरुवर्षं मया प्रोक्तं मध्यमं यदिलावृतम् ।
न तत्र सूर्यस्तपति न ते जीर्यन्ति मानवाः ॥६०.७ ॥

लभन्ते नात्मलाभञ्च रश्मयश्चन्द्रसूर्ययोः ।
नक्षत्राणां ग्रहाणाञ्च मेरोस्तत्र परा द्युतिः ॥६०.८ ॥

पद्मप्रभाः पद्मगन्धा जम्बूफलरसाशिनः ।
पद्मपत्रायताक्षास्तु जायन्ते तत्र मानवाः ॥६०.९ ॥

वर्षाणान्तु सहस्राणि तत्राप्यायुस्त्रयोदश ।
सरावाकारसंस्तारो मेरुमध्ये इलावृते ॥६०.१० ॥

मेरुस्तत्र महाशैलस्तदाख्यातमिलावृतम् ।
रम्यकं वर्षमस्माच्च कथयिष्ये निबोध तत् ॥६०.११ ॥

वृक्षस्तत्रापि चोत्तुङ्गो न्यग्रोधो हरितच्छदः ।
तस्यापि ते फलरसं पिबन्तो वर्तयन्ति वै ॥६०.१२ ॥

वर्षायुतायुषस्तत्र नरास्तत्फलभोगिनः ।
रतिप्रधानविमला जरादौर्गन्ध्यवर्जिताः ॥६०.१३ ॥

तस्मादथोत्तरं वर्षं नाम्ना ख्यातं हिरण्मयम् ।
हिरण्वती नदी यत्र प्रभूतकमलोज्ज्वला ॥६०.१४ ॥

महाबलाः सतेजस्का जायन्ते तत्र मानवाः ।
महाकाया महासत्त्वा धनिनः प्रियदर्शनाः ॥६०.१५ ॥

इति श्रीमार्कण्डेयपुराणेठकिंपुरुषादिवर्षवर्णनम्ऽ नाम षष्टितमोऽध्यायः

About this digital edition

This e-book comes from the online library Wikisource[1]. This multilingual digital library, built by volunteers, is committed to developing a free accessible collection of publications of every kind: novels, poems, magazines, letters...

Wikisource is constantly looking for new members. During the realization of this book, it's possible that we made some errors. You can report them at this page[4].

The following users contributed to this book:

- Puranastudy

---

1. ↑ https://wikisource.org
2. ↑ https://www.creativecommons.org/licenses/by-sa/3.0
3. ↑ https://www.gnu.org/copyleft/fdl.html
4. ↑ https://wikisource.org/wiki/Wikisource:Scriptorium